श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तमः सर्गः ॥

## विष्णुना रक्षसां संहारस्तेषां पलायनं च

नारायणगिरिं ते तु गर्जन्तो राक्षसाम्बुदाः।
अर्दयन्तोऽस्त्रवर्षेण वर्षेणेवाद्रिमम्बुदाः॥ 7.7.1 ॥

श्यामावदातस्तैर्विष्णुर्नीलैर्नक्तञ्चरोत्तमैः।
वृतोऽञ्जनगिरीवायं वर्षमाणैः पयोधरैः॥ 7.7.2 ॥

शलभा इव केदारं मशका इव पावकम्।
यथामृतघटं दंशा मकरा इव चार्णवम्॥ 7.7.3 ॥

तथा रक्षोधनुर्मुक्ता वज्रानिलमनोजवाः।
हरिं विशन्ति स्म शरा लोका इव विपर्यये॥ 7.7.4 ॥

स्यन्दनैः स्यन्दनगता गजैश्च गजमूर्धगाः।
अश्वारोहास्तथाश्वैश्च पादाताश्चाम्बरे स्थिताः॥ 7.7.5 ॥

राक्षसेन्द्रा गिरिनिभाः शरैः शक्त्यृष्टितोमरैः।
निरुच्छ्वासं हरिं चक्रुः प्राणायामा इव द्विजम्॥ 7.7.6 ॥

निशाचरैस्ताड्यमानो मीनैरिव महोदधिः।
शार्ङ्गमायम्य दुर्धर्षो राक्षसेभ्योऽसृजच्छरान्॥ 7.7.7 ॥

शरैः पूर्णायतोत्सृष्टैर्वज्रकल्पैर्मनोजवैः।
चिच्छेद विष्णुर्निशितैः शतशोऽथ सहस्रशः॥ **7.7.8** ॥

विद्राव्य शरवर्षेण वर्षं वायुरिवोत्थितम्।
पाञ्चजन्यं महाशङ्खं प्रदध्मौ पुरुषोत्तमः॥ **7.7.9** ॥

सोऽम्बुजो हरिणा ध्मातः सर्वप्राणेन शङ्खराट्।
ररास भीमनिर्ह्लादस्त्रैलोक्यं व्यथयन्निव॥ **7.7.10** ॥

शङ्खराजरवः सोऽथ त्रासयामास राक्षसान्।
मृगराज इवारण्ये समदानिव कुञ्जरान्॥ **7.7.11** ॥

न शेकुरश्वाः संस्थातुं विमदाः कुञ्जराऽभवन्।
स्यन्दनेभ्यश्च्युता वीराः शङ्खरावितदुर्बलाः॥ **7.7.12** ॥

शार्ङ्गचापविनिर्मुक्ता वज्रतुल्याननाः शराः।
विदार्य तानि रक्षांसि सुपुङ्खा विविशुः क्षितिम्॥ **7.7.13** ॥

भिद्यमानाः शरैः सङ्ख्ये नारायणकरच्युतैः।
निपेतू राक्षसा भूमौ शैला वज्रहता इव॥ **7.7.14** ॥

व्रणानि परगात्रेभ्यो विष्णुचक्रकृतानि हि।
असृक् क्षरन्ति धाराभिः स्वर्णधारा इवाचलाः॥ **7.7.15** ॥

शङ्खराजरवश्चापि शार्ङ्गचापरवस्तथा।
राक्षसानां रवांश्चापि ग्रसते वैष्णवो रवः॥ **7.7.16** ॥

तेषां शिरोधरान् धूताञ्छरध्वजधनूंषि च।
रथान् पताकास्तूणीरांश्चिच्छेद स हरिः शरैः॥ **7.7.17** ॥

सूर्यादिव करा घोरा वार्योघा इव सागरात्।
पर्वतादिव नागेन्द्रा धारौघा इव चाम्बुदात्॥ **7.7.18** ॥

तथा शार्ङ्गविनिर्मुक्ताः शरा नारायणेरिताः।
निर्धावन्तीषवस्तूर्णं शतशोऽथ सहस्रशः॥ **7.7.19** ॥

शरभेण यथा सिंहाः सिंहेन द्विरदा यथा।
द्विरदेन यथा व्याघ्रा व्याघ्रेण द्वीपिनो यथा॥ **7.7.20** ॥

द्वीपिनेव यथा श्वानः शुना मार्जारको यथा।
मार्जारेण यथा सर्पाः सर्पेण च यथाखवः॥ **7.7.21** ॥

तथा ते राक्षसाः सर्वे विष्णुना प्रभविष्णुना।
द्रवन्ति द्राविताश्चान्ये शायिताश्च महीतले॥ **7.7.22** ॥

राक्षसानां सहस्राणि निहत्य मधुसूदनः।
वारिजं पूरयामास तोयदं सुरराडिव॥ **7.7.23** ॥

नारायणशरत्रस्तं शङ्खनादसुविह्वलम्।
ययौ लङ्कामभिमुखं प्रभग्नं राक्षसं बलम्॥ **7.7.24** ॥

प्रभग्ने राक्षसबले नारायणशराहते।
सुमाली शरवर्षेण निववार रणे हरिम्॥ **7.7.25** ॥

स तु तं छादयामास नीहार इव भास्करम्।
राक्षसाः सत्त्वसम्पन्नाः पुनर्धैर्यं समादधुः॥ **7.7.26** ॥

अथ सोऽभ्यपतद् रोषाद् राक्षसो बलदर्पितः।
महानादं प्रकुर्वाणो राक्षसाञ्जीवयन्निव॥ **7.7.27** ॥

उत्क्षिप्य लम्बाभरणं धुन्वन् करमिव द्विपः।
ररास राक्षसो हर्षात् सतडित्तोयदो यथा॥ **7.7.28** ॥

सुमालेर्नर्दतस्तस्य शिरो ज्वलितकुण्डलम्।
चिच्छेद यन्तुरश्वाश्च भ्रान्तास्तस्य तु रक्षसः॥ **7.7.29** ॥

तैरश्वैर्भ्राम्यते भ्रान्तैः सुमाली राक्षसेश्वरः।
इन्द्रियाश्वैः परिभ्रान्तैर्धृतिहीनो यथा नरः॥ **7.7.30** ॥

ततो विष्णुं महाबाहुं प्रपतन्तं रणाजिरे।
हृते सुमालेरश्वैश्च रथे विष्णुरथं प्रति॥ **7.7.31** ॥

माली चाभ्यद्रवद् युक्तः प्रगृह्य सशरं धनुः।
मालेर्धनुश्च्युता बाणाः कार्तस्वरविभूषिताः॥ **7.7.32** ॥

विविशुर्हरिमासाद्य क्रौञ्चं पत्ररथा इव।
अर्द्यमानः शरैः सोऽथ मालिमुक्तैः सहस्रशः॥ **7.7.33** ॥

चुक्षुभे न रणे विष्णुर्जितेन्द्रिय इवाधिभिः।
अथ मौर्वीस्वनं श्रुत्वा भगवान् भूतभावनः॥ **7.7.34** ॥

मालिनं प्रति बाणौघान् ससर्जासिगदाधरः।
ते मालिदेहमासाद्य वज्रविद्युत्प्रभाः शराः॥ **7.7.35** ॥

पिबन्ति रुधिरं तस्य नागा इव सुधारसम्।
मालिनं विमुखं कृत्वा शङ्खचक्रगदाधरः॥ **7.7.36** ॥

मालिमौलिं ध्वजं चापं वाजिनश्चाप्यपातयत्।
विरथस्तु गदां गृह्य माली नक्तञ्चरोत्तमः॥ **7.7.37** ॥

आपुप्लवे गदापाणिर्गिर्यग्रादिव केसरी।
गदया गरुडेशानमीशानमिव चान्तकः॥ **7.7.38** ॥

ललाटदेशेऽभ्यहनद् वज्रेणेन्द्रो यथाचलम्।
गदयाभिहतस्तेन मालिना गरुडो भृशम्॥ **7.7.39** ॥

रणात् पराङ्मुखं देवं कृतवान् वेदनातुरः।
पराङ्मुखे कृते देवे मालिना गरुडेन वै॥ **7.7.40** ॥

उदतिष्ठन्महाशब्दो रक्षसामभिनर्दताम्।
रक्षसां रुवतां रावं श्रुत्वा हरिहयानुजः॥ **7.7.41** ॥

तिर्यगास्थाय सङ्क्रुद्धः पक्षीशे भगवान् हरिः।
पराङ्मुखोऽप्युत्ससर्ज मालेश्चक्रं जिघांसया॥ **7.7.42** ॥

तत् सूर्यमण्डलाभासं स्वभासा भासयन् नभः।
कालचक्रनिभं चक्रं मालेः शीर्षमपातयत्॥ **7.7.43** ॥

तच्छिरो राक्षसेन्द्रस्य चक्रोत्कृत्तं विभीषणम्।
पपात रुधिरोद्गारि पुरा राहुशिरो यथा॥ **7.7.44** ॥

ततः सुरैः सम्प्रहृष्टैः सर्वप्राणसमीरितः।
सिंहनादरवो मुक्तः साधु देवेतिवादिभिः॥ **7.7.45** ॥

मालिनं निहतं दृष्ट्वा सुमाली माल्यवानपि।
सबलौ शोकसन्तप्तौ लङ्कामेव प्रधावितौ॥ **7.7.46** ॥

गरुडस्तु समाश्वस्तः सन्निवृत्य यथा पुरा।
राक्षसान् द्रावयामास पक्षवातेन कोपितः॥ **7.7.47** ॥

चक्रकृत्तास्यकमला गदासञ्चूर्णितोरसः।
लाङ्गलग्लपितग्रीवा मुसलैर्भिन्नमस्तकाः॥ **7.7.48** ॥

केचिच्चैवासिना छिन्नास्तथान्ये शरताडिताः।
निपेतुरम्बरात् तूर्णं राक्षसाः सागराम्भसि॥ **7.7.49** ॥

नारायणोऽपीषुवराशनीभि -
    र्विदारयामास धनुर्विमुक्तैः।
नक्तञ्चरान् धूतविमुक्तकेशान्
    यथाशनीभिः सतडिन्महाभ्रः॥ **7.7.50** ॥

भिन्नातपत्रं पतमानशस्त्रं
शरैरपध्वस्तविनीतवेषम्।
विनिःसृतान्त्रं भयलोलनेत्रं
बलं तदुन्मत्ततरं बभूव॥ **7.7.51** ॥

सिंहार्दितानामिव कुञ्जराणां
निशाचराणां सह कुञ्जराणाम्।
रवाश्च वेगाश्च समं बभूवुः
पुराणसिंहेन विमर्दितानाम्॥ **7.7.52** ॥

ते वार्यमाणा हरिबाणजालैः
स्वबाणजालानि समुत्सृजन्तः।
धावन्ति नक्तञ्चरकालमेघा
वायुप्रणुन्ना इव कालमेघाः॥ **7.7.53** ॥

चक्रप्रहारैर्विनिकृत्तशीर्षाः
सञ्चूर्णिताङ्गाश्च गदाप्रहारैः।
असिप्रहारैर्द्विविधाविभिन्नाः
पतन्ति शैला इव राक्षसेन्द्राः॥ **7.7.54** ॥

विलम्बमानैर्मणिहारकुण्डलै -
र्निशाचरैर्नीलबलाहकोपमैः।
निपात्यमानैर्ददृशे निरन्तरं
निपात्यमानैरिव नीलपर्वतैः॥ **7.7.55** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तमः सर्गः॥